**सूर्यस्तोत्र महामन्त्रं**
----------------------------------

ओं सत्गुरुभ्यो नमः

अस्य श्री सूर्यस्तोत्रमहामन्त्रस्य अगस्त्य ऋषि
अनुष्टुप्प् छन्दः सूर्यनारायणो देवता, सूं बीजं
रीं शक्तिः यं कीलकं, सूर्य प्रसादसिद्ध्यर्त्थे जपे विनियोगः

आदित्याय अंगुष्टाभ्यां नमः
अर्क्काय तर्ज्जनीभ्यां नमः
दिवाकराय मद्ध्यमाभ्यं नमः
प्रभाकराय अनामिकाभ्यां नमः
सहस्रकिरणाय कनिष्ठिकाभ्यां नमः
मार्त्ताण्डाय करतलकरपृष्ठाभ्यां नमः

आदित्याय हृदयाय नमः
अर्क्काय शिरसे स्वाह
दिवाकराय शिखायै वषट्
प्रभाकराय कवचाय हूं
सहस्रकिरणाय नेत्राभ्यां वौषट्
मार्त्ताण्डाय अस्त्राय फट्
भूर्भुवस्सुवरोमिति दिक्बन्धः

**ध्यानं**

ध्यायेत् सूर्यमनन्तशक्तिकिरणं
तेजोमयं भास्करं
भक्तानामभयप्रदं दिनकरं
ज्योतिर्मयं शङ्करं
आदित्यं जगदीशमच्युतमजं
त्रैलोक्यचूडामणिं
भक्ताभीष्टवरप्रदं दिनमणिं
मार्त्ताण्डमाद्यं शुभं (1)

ब्रह्माविष्णुश्चरुद्रश्च
ईश्वरश्च सदाशिवः
पञ्चब्रह्ममयाकारा येन
जाता नमामि तं (2)

कालात्मा सर्व्वभूतात्मा
वेदात्मा विश्वतोमुखः
जन्ममृत्यु जराव्याधि
संसारभयनाशनः (3)

ब्रह्मस्वरूप उदये
मद्ध्याह्ने तु सदाशिवः
अस्तकाले स्वयं विष्णुः
त्रयीमूर्त्तिर् दिवाकरः (4)

एकचक्ररथो यस्य
दिव्यःकनकभूषितः
सोऽयं भवतु नः प्रीतः
पत्महस्तो दिवाकरः (5)

पत्महस्तः परंज्योतिः
परेशायनमो नमः
अण्डयोने कर्म्मसाक्षिन्
आदित्याय नमोनमः (6)

कमलासनदेवेश
कर्म्मसाक्षिन् नमोनमः
धर्म्ममूर्त्ते दयामूर्त्ते
तत्वमूर्त्ते नमोनमः (7)

सकलेशाय सूर्याय
सर्व्वयज्ञाय नमोनमः
क्षयापस्मारगुल्मादि
व्याधिहन्त्रे नमोनमः (8)

सर्व्वज्वरहरश्चैव
सर्व्वरोगनिवारणं
स्तोत्रमेतत् शिवप्रोक्तं
सर्व्वसिद्धिकरं परं (9)